This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

पं. ५. 20
२२४

॥श्रीईशासहितभाष्यस्येदंपुस्तकं॥श्रीराम॥

Acc No: ~~480~~ M1161
Title:- ईशावास्यभाष्य
Author:- शंकराचार्य
Subject:- वेदांत
पत्रे:- ⑱

①

K.K.S.U. LIBRARY RAMTEK 441106 M1161 Dist. Nagpur

Checked 2012

ईशा० भाष्य

॥१॥ श्रीगणेशाय नमः ॥ ईशावास्यादयो मंत्राः कर्मस्वविनियुक्तास्तेषामकर्मशे त्वै
षस्यात्मनो याथात्म्यप्रकाशकत्वात्। याथात्म्यं चात्मनः शुद्धत्वापापविद्धैकत्व त्वे
नित्यत्वाशरीरत्वसर्वगतत्वादि वक्ष्यमाणं कर्मणा विरुध्येत इति युक्त एवैषां नच्चेर
कर्मस्वविनियोगः। न चैवंलक्षणमात्मनो याथात्म्यमुत्पाद्यं विकार्यमाप्यं सं
स्कार्यं वा कर्तृभो[illegible]क्तृ वा येन कर्मशेषता स्यात्। सर्वासामुपनिषदामात्मया
थात्म्यनिरूपणेनैवोपक्षयात्। गीतानां मोक्षधर्माणां [illegible]वंपरत्वात्। तस्मादात्मनोऽ च्चैद
नेकत्वकर्तृत्वभोक्तृत्वाशुद्धत्वपापविद्धत्वादि चोपादाय लोकबुद्धिसिद्धं कर्मा
णि विहितानि। यो हि कर्मफलेनार्थी दृष्टेन ब्रह्मवर्चसादिनाऽदृष्टेन स्वर्गादिना च
द्विजातिरहं न काणकुब्जत्वाद्यनधिकारधर्मवानित्यात्मानं मन्यते। सोऽधिक्रिय
ते कर्मस्विति हि अधिकारविदो वदंति। तस्मादेते मंत्रा आत्मनो याथात्म्यप्रकाश
नेनात्मविषयं स्वाभाविक[illegible]ज्ञानं निवर्त्तयंतः शोकमोहादिसंसारधर्मवि
च्छित्तिसाधनमात्मैकत्वादिविज्ञानमुत्पादयंतीति। एवमुक्ताभिधेयसंबंधप्रयो
जनान्मंत्रान्संक्षेपतो व्याख्यास्यामः ॥ छ ॥ श्री ॥ ईशा ईष्टे इतीट् तेनेशा। ईशिता
परमेश्वरः परमात्मा स हि सर्वमीष्टे। सर्वजंतूनामात्मा सन् तेन स्वेनात्मनेशा वास्यं
आच्छादनीयं। किमिदं सर्वं यत्किंचिज्जगत्यां पृथिव्यां जगत् तत्सर्वं स्वेनात्मनाऽह
मेवेदं सर्वमिति परमार्थसत्यरूपेणानृतमिदं सर्वमाच्छादनीयं। स्वेन परमात्मना

जगत्सां

यथाचंदनागवदिरुदकादिसंबंधजं क्लेदादिजं दौर्गंध्यं तत्स्वरूपनिघर्षणेनाछाद्यते स्वेन [redacted] पारमार्थिकेन गंधेन तद्वदेव हि स्वात्मन्यध्यस्तं स्वाभाविकं कर्तृत्वभोक्तृत्वादिलक्षणं जगत् द्वैतरूपं पृथिव्यां जगत्यामित्युपलक्षणार्थत्वात्सर्वमेव नामरूपकर्माख्यं विकारजातं परमार्थसत्यात्मभावनया त्यक्तं स्यात्॥ एवमीश्वरात्मभावनयायुक्तस्य पुत्राद्येषणात्रयसंन्यास एवाधिकारो न कर्मसु। तेन त्यक्तेन त्यागेनेत्यर्थः। न हि त्यक्तो मृतः पुत्रो भृत्यो वा आत्मसंबंधिताया अभावादात्मानं पालयति। [redacted]

॥श्रीगणेशाय नमः॥श्रीराम॥हरिः ॐ॥ईशावास्यमिदं सर्वं यत्किं
च जगत्यां जगत्॥तेन त्यक्तेन भुंजीथा मा गृधः कस्यस्वित्धनम्॥१॥

अतस्त्यागेनेत्ययमेवा[redacted]र्थः। भुंजीथाः पालयेथाः। एवं त्यक्तैषणस्त्वं मा गृधः गृधिमाकांक्षां मा कार्षीर्धनविषयां कस्यस्वित् [redacted] स्वस्य परस्य वा धनं माकांक्षीरित्यर्थः। स्विदित्यनर्थको निपातः। अथवा मा गृधः कस्मात्कस्यस्वित्धनमित्याक्षेपार्थो न कस्यस्वित्धनमिति। यत्गत्येतात्मैव सर्व[redacted]मितीश्वरभावनया सर्वं त्य[redacted]क्तमतः स्वात्मैवेदं सर्वं अतो मिथ्याविषयां गृधिं मा कार्षीरित्यर्थः॥१॥छ॥ श्रीमद्रामचंद्रगुरुमूर्तये नमः॥ श्रीकृष्ण॥

ईशा·भाष्य

॥२॥ ॥एवमात्मविदः पुत्राद्येषणात्रयसंन्यासेनात्मज्ञाननिष्ठतया आत्मा रक्षितव्य इ
त्येष वेदार्थो दर्शितम् अथेतरस्यानात्मज्ञतया आत्मग्रहणायाशक्तस्येदमुप
दिशति मंत्रः॥ कुर्वन्नि[illegible]त्यादि॥ कुर्वन्नेवेह निर्वर्त्तयन्नेव कर्माण्यग्निहोत्रादीनि
जिजीविषेत् जीवितुमिच्छेत्॥ शतं शतसंख्याकाः समाः संवत्सरान्। तावद्धि पु
स्य रुष परमायुरुचितं यथाप्राप्तानुवादेन यज्जिजीविषेच्छतं वर्षाणि तत्कुर्वन्ने
व कर्माणीत्येतद्विधीयते। एवमेवंप्रकारेण त्वयि जिजीविषति नरे नरमात्राभिमानि
नि। इत एतस्मात् कुर्वतो वर्त्तमानात्प्रकारात्। अन्यथाप्रकारांतरं नास्ति। येन न

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः। एवं त्वयि नान्यथेतोऽस्ति न कर्म लि
प्यते नरे॥२॥

प्रकारेण अशुभं कर्म न लिप्यते कर्मणा न लिप्यत इत्यर्थः॥ अतः शास्त्रविहितानि
कर्माण्यग्निहोत्रादीनि कुर्वन्नेव जिजीविषेत्। कथं पुनरिदमवगम्यते। पूर्वेण मं-
त्रेण संन्यासज्ञाननिष्ठोक्ता द्वितीयेन तदशक्तस्य कर्मनिष्ठेति उच्यते। ज्ञानकर्म
णोर्विरोधं पर्वतवदकंप्यं। यथोक्तं न स्मरसि किं। इहाप्युक्तं यो हि जिजीविषेत्
स कर्म कुर्वन्। ईशावास्यमिदं तेन त्यक्तेन भुंजीथा मा गृधः कस्यस्विद्धनमिति च॥
न जीविते मरणे वा गृधिं कुर्वीतारण्यमीयादिति च ततो न पुनरेयादिति संन्यासशा
सनात्। उभयोः फलभेदं च वक्ष्यति। इमौ द्वावेव पंथानौ अनुनिष्क्रांततरौ भवतः।

सर्वेर

क्रियापथश्चैव पुरस्तात्संन्यासश्च तयोः सन्यास एवातिरेचयति ॥ न्यास एवा
परेचयदिति तैत्तिरीयके। द्वाविमावथ पंथानौ यत्र वेदाः प्रतिष्ठिताः। प्रवृत्तिल
क्षणो धर्मो निवृत्तौ च विभाषितः इति सादिपुत्राय विचार्य निश्चितमुक्तं व्यासे
न वेदाचार्येण भगवता ॥ विभागं च तयोर्दर्शयिष्यामः ॥२।६॥ अथेदानीमविद्व
न्निंदार्थोयं मंत्र आरभ्यते ॥ असुर्याः परमात्मभावमद्वयमपेक्ष्य देवादयोप्यसुरा
स्तेषां स्वभूताः असुर्याः। नामशब्दोऽनर्थको निपातः। ते लोकाः कर्मफलानि लो
क्यंते दृश्यंते भुज्यंते इति जन्मानि। अंधेनादर्शनात्मकेनाज्ञानेन तमसा आछि वृता

असुर्या नाम ते लोका अंधेन तमसा वृताः। तांस्ते प्रेत्याभिगच्छंति ये केचा
त्महनो जनाः ॥३॥

स्ता दितौ [redacted] न स्थावरांतान् प्रेत्य त्यक्त्वा इमं देहं अभिगच्छंति। यथाकर्म यथाकृतं
ये केचात्महनः आत्मानं घ्नंतीत्यात्महनः। के ते। ये अविद्वांसः। कथं ते आत्मा
नं नित्यं हिंसंति अविद्यादोषेण विद्य[redacted]मानस्यात्मन[redacted]नस्तिरस्करणा
द्विद्यमानस्यात्मनो यत्कार्यं फलं अजरामरत्वादि संवेदनादिलक्षणं तद्धत
स्येव तिरोभूतं भवतीति ॥ प्राकृता अविद्वांसो जना आत्महन उच्यंते। तेन हि
न स्वात्महननदोषेण संसरंति ॥३॥ यस्यात्मनो हननादविद्वांसो संसरंति तद्वि

ईशा·भाष्य
॥३॥

ये १ पर्यीर्णो विद्वांसो मुच्यंते नात्महनः तत्कीदृशमात्मतत्वमित्युच्यते ॥ अनेजत् नेजत्
एजृ कंपने कंपनं चलनं स्थिरत्वमुच्यते तस्त्रदूर्जितं सर्वदैकरूपमित्यर्थः ॥ तच्चैकं स
र्वभूतेषु मनसः संकल्पादिलक्षणाज्जवीयो जववत्तरं कथं विरुद्धमुच्यते ध्रुवं
निश्चलमिदं मनसो जवीयश्चेति चेन्नैष दोषः ॥ निरुपाध्युपाधिमत्त्वोपपत्तेः ॥ तत्र
निरुपाधिकं स्वेन रूपेणोच्यते ॥ अनेजदेकमिति ॥ मनसोंतःकरणस्य संक
ल्पादिलक्षणस्योपाधेरनुवर्तमानादिह देहस्थस्य मनसो ब्रह्मलोकादिदूरस्थ

अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन्पूर्वमर्शत् ॥ तद्धावतोन्यानत्येति ति
ष्ठत्तस्मिन्नपो मातरिश्वा दधाति ॥ ४ ॥ श्रीरामचंद्र ॥

संकल्पनेक्षणमात्रेण भवतीत्यतो मनो जविष्ठं लोके प्रसिद्धं तस्मिन्मनसि ब्रह्मलोकादी
न्द्रुतं गच्छति प्रथमं प्राप्त इवात्म चैतन्याभासोऽगृह्यतेऽतो मनसो जवीय इत्याह ॥
नैनद्देवाः द्योतनाद्देवाश्चक्षुरादीनींद्रियाणि ॥ एतत्प्रकृतमात्मतत्वं नाप्नुवन्ना
प्तवंतः ॥ तेभ्यो मनो जवीयो मनोव्यापारव्यवहितत्वादाभासमात्रमप्यात्मनो नै
व देवानां विषयी भवति यस्माज्जवनान्मनसोपि पूर्वमेव गतं व्योमवद्व्यापित्वात्सर्व
व्यापितदात्मतत्वं सर्वसंसारधर्मवर्जितं स्वेन निरुपाधिकेन स्वरूपेणाविक्रियमेव य

नि १

दुपाधिकृताः सर्वाः संसारविक्रिया अनुभवतीवाविवेकिनां मूढानामनेकमिव च
प्रतिदेहं प्रत्यवभासत इत्येतदाह॥ तद्धावतो द्रुतं गच्छतोऽन्यान्मनोवागिंद्रियप्रभृती
नन्यात्मविलक्षणानत्येत्यतीत्य गच्छतीवार्थं स्वयमेव दर्शयति तिष्ठदिति स्वय
मक्रियमेव सदित्यर्थः॥ तस्मिन्नात्मतत्वे सति नित्यचैतन्यस्वभावे मातरिश्वा मा
तरि अंतरिक्षे श्वसितीति वायुः सर्वप्राणभृत्क्रियात्मको यदाश्रयाणि कार्यका
रणजातानि यस्मिन्नोतानि प्रोतानि च यत्सूत्रसंज्ञकं सर्वस्य जगतो विधारयितृ स
मातरिश्वा अपः कर्माणि प्राणिनां चेष्टालक्षणानि अग्न्यादित्यादीनां च ज्वलनद
तू तदेजति तन्नैजति तद्दूरे तद्वंतिके॥ तदंतरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः॥५॥
हन प्रकाशाभिवर्षणादिलक्षणानि दधाति विभजतीत्यर्थः॥ धारयतीति वा भीषा
स्माद्वातः पवते भीषोदेति सूर्य इत्यादिश्रुतिभ्यः॥ सर्वा हि कार्यकारणादिविक्रिया
नित्यचैतन्यात्मस्वरूपे सर्वास्पदरूपे सत्येव भवंतीत्यर्थः॥४॥ मंत्राणां जामिताना
स्तीति पूर्वमंत्रोक्तमप्यर्थं पुनराह॥ तदात्मतत्वं यत्प्रकृतं तदेजति चलति॥ तदेव च नए
जति स्वतो नैव चलति॥ अचलमेव सच्चलतीवेत्यर्थः॥ किं च तद्दूरे वर्षकोटिशतैरप्य
विदुषामप्राप्यत्वाद्दूर इव तद्वंतिके समीपेऽत्यंतमेव विदुषामात्मत्वात्॥ न केवलं दूरे अंति

7

केच तदभ्यंतरे। सर्वस्यात्मा सर्वांतर इति श्रुतेः॥ अस्य सर्वस्य जगतो नामरूपक्रिया
त्मकस्य तदु अपि सर्वस्यास्य [illegible] बाह्यतो व्यापित्वादाकाशवन्निरतिशयसूक्ष्मत्वा
दंतः प्रज्ञानघन एवेति शासनान्निरंतरं॥५॥ छ॥ यस्तु यः परिव्राट् मुमुक्षुः सर्वा
णि च भूतान्यव्यक्तादीनि स्थावरांतान्यात्मन्येवानुपश्यति। आत्मव्यतिरिक्तानि
न पश्यतीत्यर्थः॥ छांदसो विभक्तेर्लुक्। सर्वेषु भूतेषु च तेष्वेव चात्मानं तेषाम
पि भूतानां स्वमात्मानमात्मत्वेन। यथास्य कार्यकारणसंघातस्यात्माहं सर्व
प्रत्यसाक्षीभूतश्चेतयिता केवलो निर्गुणोऽनेनैव स्वरूपेणाव्यक्तादीनां स्था

यस्तु सर्वाणि भूतान्यात्मन्नेवानुपश्यति॥ सर्वभूतेषु चात्मानं
ततो न विजुगुप्सते॥६॥ श्रीरामचंद्रचरणारविंदाभ्यां नमः॥

वरांतानामहमेवात्मेति सर्वभूतेषु चात्मानं यस्तु निर्विशेषं पश्यति स
ततं तस्मादेव दर्शनात् न विजुगुप्सते विजुगुप्सां घृणां न करोति। प्राप्तस्यै
वानुवादोयं॥ सर्वा हि घृणा आत्मनोन्यद्दुष्टं पश्यतो भवति आत्मान
मेव च संततं विशुद्धं निरंतरं पश्यतो न घृणानिमित्तमस्तीति प्राप्तमेव
ततो न विजुगुप्सत इति॥६॥ श्रीराम॥ इममेवार्थमन्योपि मंत्र आह॥
यस्मिन् सर्वाणि भूतानि यस्मिन् काले यथोक्ता[illegible]त्मनि तान्येव भू

तानि सर्वाणि परमार्थात्मदर्शनादात्मैवाभूत् ॥ आत्मैव संवृत्तः पर
मार्थवस्तु विजानतः ॥ तत्र तस्मिन्काले तत्रात्मनि वा को मोहः कः शोको
मोहश्च कामबीजमजानतः भवति न त्वात्मैकत्वं विशुद्धं गगनोपमं पश्यतः
को मोहः कः शोक इति शोकमोहयोरविद्याकार्ययोराक्षेपेण संभवप्रका
शनात्ससंबंधकारणस्य संसारस्यात्यंतमेवोच्छेदः प्रदर्शितो भवति ॥७॥

यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः ॥ तत्र को मोहः कः शोक ए
कत्वमनुपश्यतः ॥७॥ स पर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्ध
मपापविद्धं ॥ कविर्मनीषी परिभूः स्वयंभूर्याथातथ्यतोऽर्था
यो यमतीतैर्मंत्रैरुक्त आत्मा सः ९ न्व्यदधाच्छाश्वतीभ्यः समाभ्यः ॥८॥
स्वेन रूपेण किंलक्षण इत्याहायं मंत्रः ॥ स पर्यगात्स यथोक्त आत्मा प
त र्यगात्परिसमंतादगाद्गतवानाकाशवद्व्यापीत्यर्थः ॥ शुक्रं शुद्धं ज्योति
ष्मद्दीप्तिमानित्यर्थः ॥ अकायमशरीरो लिंगशरीरवर्जित इत्यर्थः ॥ अव्रण
मक्षतं ॥ अस्नाविरं स्नावा यस्मिन्सिरा न विद्यंत इत्यस्नाविरं ॥ अव्रण

।।५।।

मक्षतमस्नाविरमित्याभ्यां स्थूलशरीरप्रतिषेधः। शुद्धं निर्मलं। अपापविद्धं धर्माधर्मापवर्जितं। शुद्धमित्यादीनि वचांसि पुल्लिंगत्वेन परिणेयानि। सपर्यगादित्युपक्रम्य कविर्मनीषीत्यादिना पुल्लिंगत्वेनोपसंहारात्। कविः क्रांतदर्शि सर्वदृक्। नान्योऽतोऽस्ति द्रष्टेत्यादिश्रुतेः। मनीषी मनसः ईशिता सर्वज्ञो ईश्वर इत्यर्थः। परिभूः सर्वेषामुपर्युपरि भवतीति परिभूः स्वयंभूः स्वयमेव भवती येषामुपरि भवति यश्चोपरि भवति स स्वयमेव सर्वो भवतीति स्वयंभूः स नित्यमुक्त ईश्वरो याथातथ्यतः सर्वज्ञत्वात् यथा तथा भावः याथातथ्यं यथाभूतकर्मफलसाधनतः। अर्थान् कर्तव्या[illegible] पदार्थान् व्यदधात्। विहितवान्। यथानुरूपं व्यभजदित्यर्थः।। शाश्वतीभ्यो नित्याभ्यः समाभ्यः संवत्सराख्येभ्य प्रजापतिभ्य इत्यर्थः।।८।। अत्राद्येन मन्त्रेण सर्वैषणापरित्यागेन ज्ञाननिष्ठोक्तो प्रथमो वेदार्थः। ईशावास्यमिदं सर्वं मा गृधः कस्यस्विद्धनमिति। अज्ञानां जिजीविषूणां ज्ञाननिष्ठासंभवेन कुर्वन्नेवेह कर्माणि जिजीविषेदिति कर्मनिष्ठोक्ता द्वितीयो वेदार्थः। अनयोश्च मंत्रप्रदर्शितयोर्विभागो बृहदारण्यकेऽपि दर्शितः। सोकामयत जाया मे स्यादित्यादिना अज्ञस्य कामिनः कर्माणीति मन एवास्यात्मा वाग्जायेत्यादिवचनादज्ञत्वं च कामित्वं च निश्चित

मवगम्यते तथा च तत्फलं सप्तान्नसर्गः तेष्वात्मभावेन स्वरूपावस्थानं जाया
द्येषणात्रयसंन्यासेन चात्मविदां कर्मनिष्ठाप्रातिकूल्येनात्मस्वरूपनिष्ठैव प्रदर्शि
ता किं प्रजया करिष्यामो येषां नोऽयमात्मायं लोक इत्यादिना ये तु ज्ञाननिष्ठाः संन्या
सिनस्तेभ्योऽसुर्या नाम ते इत्यादिनाऽविद्वन्निंदाद्वारेणात्मनो याथात्म्यं स पर्यगा
दित्येतदंतैर्मंत्रैरुपदिष्टं ते ह्यत्राधिकृता न कामिन इति तथा श्वेताश्वतरा
णां मंत्रोपनिषदि अत्याश्रमिभ्यः परमं पवित्रं प्रोवाच सम्यगृषिसंघजुष्टमि
त्यादि विभज्योक्तं ये तु कर्मनिष्ठाः कर्म कुर्वंत एव जिजीविषवः तेभ्य इदमुच्य

अंधं तमः प्रविशंति येऽविद्यामुपासते। ततो भूय इव ते तमो य उ विद्या
यां रताः॥९॥ श्रीकृष्ण

ते अंधं तम इत्यादि कथं पुनरवगम्यते
न तु सर्वेषामिति उच्यते। अकामिनः साध्यसाधनभेदोपमर्देन यस्मिन् सर्वाणि
भूतान्यात्मैवाभूद्विजानतः। तत्र को मोहः कः शोक एकत्वमनुपश्यतः यदात्मैक
त्वविज्ञानं तन्न केनचित्कर्मणा ज्ञानांतरेण वा ह्यमूढः समुच्चिचीषति इह तु
समुच्चिचीषयाऽविद्वदादिनिंदा। तत्र च यस्य येन समुच्चयः संभवति न्यायतः शास्त्रतो
वा तदिहोच्यते यद्दैवं वित्तं देवतादिविज्ञानं कर्मसंबंधित्वेनोपन्यस्तं न परमात्मविज्ञानं

(11)

क्षि ३

विद्ययादेवलोक इति पृथक्फलश्रवणात्। तयोर्ज्ञानकर्मणोरिहैकैकानुष्ठानर्निं
॥६॥ दासमुच्चिचीषया न निंदापरतैवैकैकस्य पृथक्फलश्रवणात्। विद्यया तदारो
हंति। विद्यया देवलोकः। न तत्र दणायंति कर्मणा पितृलोक इति। न हि शास्त्रवि
हितं किंचिदकर्तव्यतामियात्। तत्र अंधं तमः अदर्शनात्मकं तमः प्रविशंति ये ऽ
विद्यां विद्याया अन्यामविद्यां कर्मेत्यर्थः॥ तामविद्यामग्निहोत्रादिलक्षणामेव
केवलामुपासते तत्पराः संतोऽनुतिष्ठंतीत्यभिप्रायः॥ ततस्तस्मादंधात्मकात्त

अन्यदेवाहुर्विद्ययान्यदाहुरविद्यया॥ इति शुश्रुम धीराणां ये नस्त
द्विचचक्षिरे॥१०॥

मसः भूय इव बहुतरमिव ते तमः प्रविशंति कर्म हित्वा ये उ विद्यायामेव रताः देव
ताज्ञे अभिरताः॥ ९॥ श्रीराम॥ तत्रावांतरफलभेदं विद्याकर्मणोः समुच्चयका
रणमाह॥ अन्यथा फलवदफलवतोः संनिहितयोरंगांगितामा जामितेवस्यादि
त्यतः अन्यत्पृथगेव विद्यया क्रियते फलमित्याहुः वदंति। अन्यदाहुरविद्यया क
र्मणा क्रियत इति। तद्यथोक्तं कर्मणा पितृलोको विद्यया देवलोक इति॥ इत्येवं शु
श्रुम श्रुतवंतो वयं धीराणां धीमतां वचनं ये आचार्याः नोऽस्मभ्यं तत्कर्म च ज्ञानं च

विचचक्षिरे माख्यातवंतः तेषाममयमागमः पारंपर्यागत इत्यर्थः ॥१०॥ श्रीराम ॥
यत एवं वि[illegible]द्यां चाविद्यां च देवताज्ञानं कर्म चेत्यर्थः यस्तदेतदुभयं सहैकेन पुरु
षेणानुष्ठेयं वेद तस्यैवं समुच्चयकारिण ए[illegible]कपुरुषार्थसंबंधः क्रमेण स्यादित्यु
र्मणा च्यते ॥ अविद्यया क[illegible]ग्निहोत्रादिना मृत्युं स्वाभाविकं कर्मज्ञानं च मृत्युशब्द
वाच्यं ॥ तीर्त्वाऽतिक्रम्य विद्यया देवताज्ञानेनामृतं देवतात्मभावमश्नुते प्राप्नोति त
द्ध्यमृतमुच्यते यद्देवतात्मगमनं ॥११॥ अधुना व्याकृताव्याकृतोपासनयोः समु
च्चिचीषया प्रत्येकं निंदोच्यते । अंधं तमः प्रविशंति ये सं[illegible] संभूतिं संभवन

विद्यां चाविद्यां च यस्तद्वेदोभयं सह ॥ अविद्यया मृत्युं तीर्त्वा विद्ययाऽ
मृतमश्नुते ॥११॥ अंधं तमः प्रविशंति ये संभूतिमुपासते ॥ [illegible] ततो भूय
इव ते तमो य उ संभूत्यां रताः ॥१२॥

संभूतिः सा यस्य कार्यस्य सा[illegible] संभूतिस्तस्या अन्या असंभूतिः देवताप्रकृतिः
कारणमव्याकृताख्यं तामसंभूतिमव्याकृताख्यां प्रकृतिं कारणमविद्याकाम
कर्मबीजभूतामदर्शनात्मिकामुपासते ये त तदनुरूपमेवांधं तमोऽदर्शनात्म
कं प्रविशंति ततस्तस्मादपि भूयो बहुतरमिव तमः प्रविशंति ये संभूत्यां कार्य
ब्रह्मणि हिरण्यगर्भाख्ये रताः ॥१२॥ श्रीरामगुरुमूर्त्तये नमः ॥ अधुनाउभ
योरुपासनयोः समुच्चयकारणमवयवफलभेदमाह ॥ अन्यदेवप्पयगोवा

१३

तुः फलं संभवात् ॥ संभूतेः कार्यब्रह्मोपासनात् । अणिमाद्यैश्वर्यलक्षणं व्याख्या
तवंत इत्यर्थः । तथा च अन्यदाहुरसंभवात् । असंभूतेरव्याकृताद् अव्याकृतोपासना
यदुक्तमंधं तमः प्रविशंतीति प्रकृतिलय इत्यपि पौराणिकैरुच्यते इत्येवं शुश्रुम धी
राणां येन नस्तद्विचचक्षिरे । व्याकृताव्याकृतोपासनफलं व्याख्यातवंत इत्यर्थः
॥१२॥ यत एवमतः समुच्चयः संभूत्यसंभूत्युपासनयोर्युक्त एव एकपुरुषार्थ
त्वाच्चेत्याह ॥ संभूतिं च विनाशं च यस्तद्वेदोभयं सह विनाशेन विनाशो धर्मो

अन्यदेवाहुः संभवादन्यदाहुरसंभवात् ॥ इति शुश्रुम धीराणां येन नस्तद्विच
चचक्षिरे ॥१३॥ संभूतिं च विनाशं च यस्तद्वेदोभयं सह ॥ विनाशेन मृ
त्युं तीर्त्वा संभूत्यामृतमश्नुते ॥१४॥ श्रीरामचंद्रगुरुदत्तायेनमः ॥

यस्य कार्यस्य तेन धर्मेणाभेदेनोच्यते विनाश इति तेन तदुपासनेनानै
श्वर्याधर्मकामादिदोषजातं च मृत्युं तीर्त्वा हिरण्यगर्भोपासनेन ह्यणिमा
दिप्राप्तिः फलं तेनानैश्वर्यादिमृत्युमतीत्यासंभूत्याव्याकृतोपासनेना
मृतं प्रकृतिलयलक्षणमश्नुते । संभूतिं च विनाशं चेत्यत्रावर्णलोपेन नि
र्देशो द्रष्टव्यः । प्रकृतिलयफलश्रुत्यनुरोधात् । मानुषदैववित्तसाध्यं फलं
[illegible]लक्षणं प्रकृतिलयांतमेतावदेव एतावती संसारगतिः । अतः पर

पूर्वोक्तमात्मैवाभूद्विजानत इति सर्वात्मभाव एव सर्वैषणासंन्यासज्ञाननिष्ठा
फलं। एवं प्रवृत्तिनिवृत्तिलक्षणो द्विःप्रकारो वेदार्थोऽत्र प्रकाशितः॥१४॥ तत्र
प्रवृत्तिलक्षणस्य वेदार्थस्य विधिप्रतिषेधलक्षणस्य कृत्स्नस्य प्रकाशने प्रवर्ग्यांतं
ब्राह्मणमुपयुक्तं। निवृत्तिलक्षणस्य प्रकाशने तदूर्ध्वं बृहदारण्यकं तत्र निषेकादिश्म
शानांतं कर्म कुर्वन् जिजीविषेद्यो विद्यया सहापरब्रह्मविषयया। तदुक्तं। विद्यां चावि
द्यां च यस्तद्वेदोभयं सह। अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुत इति। तत्र केन मा
र्गेणामृतत्वमश्नुत इत्युच्यत इति तद्यत्सत्यमसौ स आदित्यो य एष एतस्मिन्मंडले

हिरण्मयेण पात्रेण सत्यस्यापिहितं मुखं। तत्त्वं पूषन्नपावृणु सत्यधर्मा
यदृष्टये॥१५॥

पुरुषो यश्चायं दक्षिणेऽक्षन्पुरुष एतदुभयं सत्यं ब्रह्मोपासीनो यथोक्तकर्म
कृत्वा च सोऽन्तकाले प्राप्ते सत्यात्मानमात्मनः प्राप्तिद्वारं याचते। हिरण्मयेन हरण्म
यमिव हिरण्मयं ज्योतिर्मयमित्येतेन पात्रेणेवापिधानभूतेन सत्यस्यादि
त्यमंडलस्थस्य ब्रह्मणोऽपिहितमाच्छादितं मुखं द्वारं तत्त्वं हे पूषन्नपावृणु। सत्यधर्मा
य तवैव सत्यस्योपासनात्सत्यं धर्मो यस्य मम सोऽहं सत्यधर्मस्तस्मै मह्यं अथवा यथा
भूतस्य धर्मस्यानुष्ठात्रे दृष्टये तव सत्यस्यात्मनः उपलब्धये हे पूषन् जगतः पोष
णादिति पूषा रविः। तथैव एक एव ऋषति गच्छतीत्येकर्षिः हे एकर्षे तथा सर्वस्य
॥१५॥

संयमनात्यमो हे यम तथा रश्मीनां प्राणिनां रसानांच स्वीकरणात्सूर्यः हे सूर्य प्रजापतेरपत्यं प्राजापत्यो हे प्राजापत्य व्यूह विगमय रश्मीन्स्वान् समूह एकीकुरु उपसंहर तेजस्तापकं ज्योतिः यत्ते तव रूपं कल्याणतममत्यंतशोभनं तत्ते तवात्मनः प्रसादात्पश्यामि किंचाहं न तु त्वां भृत्यवद्याचे योऽसौ मंडलस्थो व्याहृत्यवयवः पुरुषः पुरुषाकारत्वात् पूर्णं वानेन प्राणबुद्ध्यात्मना जगत्समस्तमिति पुरुषः पुरिशयनाद्वा सोऽहमस्मि भवामि॥१६॥ अथेदानीं मम मरिष्यतो वायुः प्राणोऽध्यात्मपरिच्छेदं हित्वाऽधिदैवतात्मानं सर्वात्मकमनिलममृतं सूत्रात्मानं प्रतिपद्यतामिति वाक्यशेषः। लिं

पूषन्नेकर्षे यम सूर्य प्राजापत्य व्यूह रश्मीन्समूह तेजो यत्ते रूपं कल्याणतमं तत्ते पश्यामि॥१६॥ योऽसावसौ पुरुषः सोऽहमस्मि॥ वायुरनिलममृतमथेदं भस्मांतं शरीरं॥ ॐ क्रतो स्मर कृतं स्मर क्रतो स्मर कृतं स्मर॥१७॥

गं चेदं ज्ञानकर्मसंस्कृतमुत्क्रामत्विति द्रष्टव्यं मार्गयाचनसामर्थ्यात्। अथेदं शरीरमग्नौ हुतं भस्मान्तं भूयात्। ओमिति यथोपासनं। ॐप्रतीकात्मकत्वात्सत्यात्मकमग्न्याख्यं ब्रह्माभेदेनोच्यते। हे क्रतो संकल्पात्मक स्मर। यन्मम स्मर्तव्यं तस्य कालोऽयं प्रत्युपस्थितोऽतः स्मर। एतावंतं कालं भावितं कृतमग्ने स्मर यन्मया बाल्यप्रभृत्यनुष्ठितं कर्म तच्च स्मर। क्रतो स्मर कृतं स्मरेति पुनर्वचनमादरार्थं॥१७॥

पुनरन्येन मंत्रेण मार्गं याचते। अग्ने नय गमय सुपथा शोभनेन मार्गेण सुपथे
ति विशेषणं दक्षिणमार्गनिरस्यर्थं। निर्विण्णोहं दक्षिणेन मार्गेण गतागतलक्षणे
न अतो याचे त्वां पुनः पुनर्गमनागमनवर्जितेन [illegible] शोभनेन पथा नय। राये धना
य कर्मफलभोगायेत्यर्थः अस्मान् यथोक्तधर्मविशिष्टान्। विश्वानि सर्वाणि हे
देव वयुनानि कर्माणि प्रज्ञानानि च विद्वान् जानन् किं च युयोधि वियोजय विनाशय
अस्मत्तः जुहुराणं कुटिलं वंचनात्मकं एनः पापं ततो वयं विमुक्ताः सन्त इष्टं प्राप्स्या
मइत्यभिप्रायः। किंतु वयमिदानीं ते। नशक्नुमः परिचर्यां कर्तुं भूयिष्ठां बहुतरां ते

अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान्॥ युयोध्यस्म[illegible] स्म
ज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम॥१८॥ इतिईशावास्योपनिषद्॥

तुभ्यं नमउक्तिं नमस्कारवचनं विधेम नमस्कारेण परिचरेमेत्यर्थः॥१७॥ अवि
द्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते। विनाशेन मृत्युं तीर्त्वा संभूत्यामृतमश्नु
त इति च श्रुत्या केचित्संशयं कुर्वन्ति अतस्तन्निर्धारणार्थं संक्षेपतो विचारं क
रिष्यामः। तत्र तावत्किंनिमित्तः संशय इत्युच्यते। विद्याशब्देन मुख्यापरात्म
विद्यैव कस्मान्न गृह्यते। अमृतत्वं च। ननूक्तायाः परमात्मविद्यायाश्च कर्मणश्च
विरोधात् समुच्चयोरनुपपत्तिरिति। सत्यं। विरोधस्तु नावगम्यते। विरोधाविरो

=६ क्रमेण स्यातां विद्याविद्ये इति चेन्न विद्योत्पत्तौ तदाश्रयेऽविद्यानुपपत्तेः । =६

॥१९॥ धयोः शास्त्रप्रमाणत्वाद्यथा विद्यानुष्ठानं विद्योपासनं च शास्त्रप्रमाणकं । तथा
तद्विरोधाविरोधावपि । तथा च न हिंस्यात्सर्वा भूतानीति शास्त्रादवगतं पुनः शा
स्त्रेणैव बाध्यतेऽध्वरे हिंस्यादिति ॥ एवं विद्याविद्ययोरपि स्यात् । विद्याकर्मणोश्च ।
दूरमेते विपरीते विषूची अविद्या या च । विद्येति । श्रुते विद्यां चाविद्यां चेति वचनाद
विरोध इति चेन्न । विरोधाविरोधयोर्विकल्पासंभवात् । समुच्चयविधानादवि
रोध इवेति चेन्न सहसंभवानुपपत्तेः । नह्यग्निरुष्णः प्रकाशश्चेति विज्ञानोत्पत्तौ य
स्मिन्नाश्रये ~~ऽविद्यानुपपत्तेः~~ तदुत्पन्नं तस्मिन्नेवाश्रये शीतोऽग्निरप्रकाशश्चेत्य
विद्योपपत्तिः । नापि संशयोऽज्ञानं वा । यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः
तत्र को मोहः कः शोक एकत्वमनुपश्यत इति शोकमोहाद्यसंभवश्रुतेरवि
द्यासंभवात्तदुपादानस्य कर्मणोऽप्युपपत्तिमवोचाम ॥ अमृतमित्यापेक्षिकममृ
तं विद्याशब्देनात्मविद्याग्रहणे हि हिरण्मयादिना द्वारमार्गादियाचनमनुपप
न्नं स्यात् । तस्माद्यथास्माभिर्व्याख्यात एव मंत्रार्थः ॥३०मित्युपरम्यते ॥ इति
श्रीमद्गोविंदभगवत्पूज्यपादशिष्यस्य भगवतः श्रीशंकराचार्यस्य कृतौ
ईशावास्यभाष्यसमाप्तं ॥ श्रीकृष्णार्पणमस्तु ॥ रामरामरामरामरामराम ।
॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥

KKSU LIB. RAMTEK 441 106 Dist. Nagpur
M1161

18

```
[OrderDescription]
,CREATED=19.10.20 16:38
,TRANSFERRED=2020/10/19 at 16:41:29
,PAGES=18
,TYPE=STD
,NAME=S0004191
,Book Name=M-1161-ESHAVASYA BHASYA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,
```